## अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः । (५०/२११७)

कारणस्य विकाररूपेण अभूतस्य तदात्मना भावः अभूततद्भावः । सम्पद्यतेः कर्ता सम्पद्यकर्ता । सम्पद्यकर्तरि वर्तमानात् प्रातिपदिकात् अभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभिर्योगे च्विः प्रत्ययो भवति । अशुक्लः शुक्लः सम्पद्यते, [1]तं करोति शुक्लीकरोति। मलिनं शुक्लीकरोति। शुक्लीभवति । शुक्लीस्यात् । घटीकरोति [2]मृदम् । घटीभवति । घटीस्यात् । अभूततद्भावे इति किम् ? शुक्लं करोति । नात्र प्रकृतिर्विवक्षिता । कृभ्वस्तियोगे इति किम् ? अशुक्लः शुक्लो जायते । सम्पद्यकर्तरि इति किम्, यावता अभूततद्भावसामर्थ्याल् [3]लब्धमेव सम्पद्यकर्तृत्वम् ? कारकान्तर[4]सम्पत्तौ मा भूत्, अदेवगृहे देवगृहे [5]सम्पद्यते । देवगृहस्याधेयविशेष[6]सम्बन्धेनाभूततद्भावः सत्त्वाधिकरणस्य, न कर्तुः इति ॥

## अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च । (५१/२१२१)

अरुःप्रभृतीना[7]मन्तस्य लोपो भवति च्विश्च प्रत्ययः । अत्र सर्वविशेषणसम्बन्धात् पूर्वेणैव प्रत्ययः सिद्धः, [8]लोपमात्रार्थ आरम्भः । अनरुररुः सम्पद्यते, [9]तं करोति अरूकरोति । अरूभवति । अरूस्यात् । मनस् – [10]उन्मनीकरोति । उन्मनीभवति । उन्मनीस्यात् । चक्षुस् – उच्चक्षूकरोति । उच्चक्षूभवति । उच्चक्षूस्यात् । चेतस् – विचेतीकरोति । विचेतीभवति । विचेतीस्यात् । रहस् – [11]विरहीकरोति । विरहीभवति । विरहीस्यात् । रजस् – विरजीकरोति । विरजीभवति । विरजीस्यात् ॥

## विभाषा साति कार्त्स्न्ये । (५२/२१२२)

अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि इति सर्वमनुवर्तते । अस्मिन् विषये विभाषा सातिः प्रत्ययो भवति कार्त्स्न्ये गम्यमाने । यदि प्रकृतिः [12]कृत्स्नां विकारात्मतामापद्यते इत्यर्थः । [13]अग्निसाद्भवति शस्त्रम्, अग्नीभवति [14]शस्त्रम् । [15]उदकसाद्भवति, उदकीभवति [16]लवणम् । कार्त्स्न्ये इति किम् ? एकदेशेन पटः शुक्लीभवति । विभाषाग्रहणं [17]च्वेः प्रापकम् । प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः ॥

## अभिविधौ सम्पदा च । (५३/२१२४)

अभिविधिः अभिव्याप्तिः । अभिविधौ गम्यमाने च्विविषये सातिः प्रत्ययो भवति सम्पदा योगे[18], चकारात् कृभ्वस्तिभिश्च । विभाषाग्रहणानुवृत्तेः [19]च्विरप्यभ्यनुज्ञायते । स तु [20]कृभ्वस्तिभिरेव योगे भवति, न [21]सम्पदा । [22]अग्निसात्सम्पद्यते, अग्निसाद्भवति । उदकसात्सम्पद्यते[23], [24]उदकसाद्भवति लवणम् ।

---

1. तमन्यः करोति ड. 2. मृदं नास्ति क. 3. लभ्यमेव फ, लभ्यमेव अभूततद्भावसामर्थ्यम् ह, लभ्यते एव ड. 4. सम्भूतौ ह. 5. भवति ह. 6. सम्बन्धः क. 7. अन्त्यस्य क. ह. 8. लोपमात्रार्थं वचनम् ब. क. ह. फ. 9. तं करोति नास्ति फ. 10. मनीकरोति क. 11. रहीकरोति क. 12. कृत्स्नविकारात्मतां फ, कृत्स्ना सर्वा विकारमापद्यते ह. 13. अनग्निः अग्निः सम्पद्यते इत्यधिकम् क. 14. शस्त्रम् नास्ति ह. 15. उदकसात् करोति लवणम् । उदकीकरोति । उदकीस्यात् क. 16. लवणं नास्ति ह. 17. शेषभावज्ञापकम् क. 18. च इत्यधिकम् ह. 19. च्विरस्याभ्यनुज्ञायते फ, च्विरभ्यनुज्ञायते क. 20. कृभ्वस्तियोगे एव ड. 21. च इत्यधिकम् ह. 22. असम्पदा इत्यधिकम् क. 23. लवणम् इत्यधिकम् क. 24. योगे इत्यधिकम् ह.